National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(23): 71-72
© 2019 NJHSR
www.sanskritarticle.com

**दीपेन्द्र जोशी**
शोधच्छात्रः,साहित्यविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः

**Correspondence:**
**दीपेन्द्र जोशी**
शोधच्छात्रः,साहित्यविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः

# ईश्वरविलासमहाकाव्ये रीतिवैचित्र्यम्

**दीपेन्द्र जोशी**

**रीतिसम्प्रदायः –**

रीङ्-गतौ इति धातोः क्तिन् प्रत्ययेन रीतिशब्दः निष्पद्यते। ऋग्वेदे धारारूपेऽर्थे शब्दोऽयं प्रयुक्तः। यथा - **"महीव रीतिः महतीस्तुतिरिव"**[1] इति।

रीतिसम्प्रदायस्य प्रधानप्रवर्तकः वामनाचार्यः काव्यालङ्कारसूत्रवृत्तौ "रीतिरात्मा काव्यस्य" इति उक्त्वा रीतेः स्वरूपनिरूपणं करोति।

**विशिष्टा पदरचना रीतिः विशेषो गुणात्मा।**[2]

अत्र पदरचनायां वैशिष्ट्यं रीतिरित्यभिप्रेतम्। अर्थात् ओजःप्रसादमाधुर्य-समतोदारताभिर्गुणैर्विशिष्टानां पदानां रचना रीतिर्भवति। विविधैः गुणैः जायमानेयं रीतिः वामनाचार्यमते काव्यस्य आत्मस्थानम्। श्लेषादिगुणः काव्यशोभायाः सम्पादको नित्यधर्मः। यं गुणरूपं नित्यधर्मं विना गुणालङ्कारशब्दार्थरूपस्य काव्यस्य सृष्टिरेव न भवति। एषां नित्यधर्माणां गुणानामभिव्यक्तिः रीतिद्वारैव भवति। अतः रीतिः एव काव्ये सारभूततया काव्यस्यात्मा इति वामनाचार्यस्य मतम्।

सरस्वतीकण्ठाभरणे श्रीभोजराजो रीतेर्व्युत्पत्त्यात्मिकां परिभाषां निर्दिशति। रीतिमार्गः पन्था वा –

**वैदर्भादिकृतः पन्था काव्ये मार्ग इति स्मृतः।**
**रीङ्गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते॥**[3]

आचार्यो विद्याधरः - "रसोचितशब्दार्थनिबन्धं रीतिः" इति परिभाषते।
आचार्यविश्वनाथस्य लक्षणमेवमस्ति –

**पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत्।**
**उपकर्त्री रसादीनाम्॥**[4]

अत्र विश्वनाथः शब्दार्थशरीरस्य काव्यस्य आत्मभूतानां रसादीनाम् उपकर्त्रीं पदसङ्घटनां रीतिरिति लक्षयिति।

रीतेः प्राचीनं नाम मार्ग आसीत्। वैदर्भमार्गः काव्यस्य रमणीयो मार्गः आसीत्। गौडीयमार्गश्चैको निन्दनीयमार्ग आसीत्। किन्तु भामहः स्वतन्त्रमार्ग्याचार्य आसीत्। रीतिशब्दस्य पन्था, पद्धतिः, प्रणाली, शैली इत्यादयः शब्दाः पर्यायवाचिनः। अद्यत्वेन शैली (Style) शब्देन यदभिमतं तत् पुरा रीतिशब्देनाभिप्रेतम् आसीत्।

**रीतेरुपयोगिता –**

अलङ्कारसम्प्रदायापेक्षया रीतिसम्प्रदाये काव्यस्याधिको विकासो बभूव। काव्यस्य मूलरूपविवेचने रीतिसम्प्रदायो महनीयः प्रयासो दृश्यते। चमत्कृतिं वैशिष्ट्यं रम्यत्वं च आसादयितुं रीतिरनिवार्या। भङ्गीभणिति एव कवेर्वैशिष्ट्यं साधयति। रीतिः कलात्मिकायाः प्रवृत्तेर्मूलं भवति। विशिष्टा पदसङ्घटना एव कवेः वैशिष्ट्यं साधयति।

**रीतेर्भेदः -**

आचार्यवामनो रीतिं त्रेधा विभजति यथा - वैदर्भी, गौडी, पाञ्चाली चेति।

**सा त्रेधा वैदर्भी गौडीया पाञ्चाली चेति।**[5]

दण्डिमतेन **अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम्।**

**अत्र वैदर्भीगौडीयौ वर्ण्येति प्रस्फुटान्तरै॥**[6]

भामहो रीतिद्वयम् उल्लिखति गौडीयमपि साधीयो वैदर्भमपि नान्यथा।
आचार्यविश्वनाथानुसारेण रीतिः चतुर्धा –

**पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत्।**
**उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्विधा।**
**वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा॥**[7]

भोजराजः षड्विधां रीतिं प्रतिपादयति। तद्यथा वैदर्भी, गौडी, पाञ्चाली, अवन्तिका, लाटीया, मागधी चेति। राजशेखरोऽपि तथैव मनुते। कुन्तकेन गुणानाश्रित्य त्रेधा रीतिः विभज्यते सुकुमारः, विचित्रो, मध्यमश्चेति।

**ईश्वरविलासमहाकाव्ये रीतिविचारः –**

**वैदर्भी रीतिः -**

साहित्यदर्पणे वैदर्भीरीतेः लक्षणं यथा –

**माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका।**
**अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते॥**[8]

यत्र माधुर्यव्यञ्जकवर्णाः, ललितात्मिका रचना, श्लेषादयः दश शब्दगुणाः सम्मिलिताः भवन्ति तत्र वैदर्भीरीतिः। यथा ईश्वरविलासे -

**प्रशस्ता प्रस्ताव प्रसृतरसयुक्ता गुणवती**
**दधानाऽलङ्कारप्रकरमपि नानाविधमियम्।**
**सभीतिः सदगीतिः सरसपदरीतिः सुललिता**
**प्रमोदाय स्वान्ते भवतु नवकान्तेव कविता॥**[9]

श्लोकेऽस्मिन् माधुर्यव्यञ्जकवर्णाः शोभन्ते। रचनाऽपि ललितात्मिका वर्तते। अत एव वैदर्भीरीतिः।

**अस्तातङ्काः सन्निरस्ताद्यपङ्काः**
**पीडाशङ्कावर्जिता निष्कलङ्काः।**
**विध्वस्ताऽऽधिव्याधितापानुबन्धाः**
**सर्वे यस्मिन्सत्यसन्धा वसन्ति॥**[10]

अत्रापि प्रत्येकपादे माधुर्यव्यञ्जकवर्णाः तथा ललितात्मिका रचना परिलक्ष्यन्ते। अतः वैदर्भी रीतिः।
एवं महाकाव्येऽस्मिन् वैदभीरीतेः वर्णना विद्यते।

**गौडी रीतिः –**

आचार्यविश्वनाथेन गौडीलक्षणमेवं प्रतिपादितम् -

**ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः।**
**समासबहुला गौडी॥**[11]

ओजोगुणस्य अभिव्यञ्जकवर्णाः तथा समासबहुलरचना यत्र भवन्ति तत्रैव गौडी रीतिः। ईश्वरविलासमहाकाव्ये यथा –

**प्रोद्यद्योवनयौवतोद्धतयुवप्रारब्धमानोल्लस-**
**न्नानाबन्धनिबन्धवन्निधुवनप्रौढिक्रियासादिषु।**
**यत्सौधेषु समीरणाः सुमनसां सौरभ्यसम्भारिणो**
**भान्तीशेक्षणवह्निदग्धकुसुमेषूच्छावासजीवातवः॥**[12]

अत्र ओजगुणस्य अभिव्यञ्जकाः वर्णाः तथा समासबहुला रचनाऽपि विद्यते। अतः गौडी रीतिः।

**उन्मुक्तवल्गं द्रुतमेकहस्त-**
**सम्यग्धृतोष्णीषमुगीर्णनादम्।**
**दधाविरे वाहनिषादिवीराः**
**कोशोद्धृतक्रूरकृपाणि हस्ताः॥**[13]

शीघ्रमेव शत्रुणामुपरि आक्रमणस्य प्रयोगे ओजगुणाभिव्यञ्जकानां प्रयोगः। अतः गौडी रीतिः।
एवं महाकाव्ये स्थाने स्थाने गीडी रीतेः प्रयोगः कविना कृतः विद्यते।

**पाञ्चाली रीतिः –**

पाञ्चालीरीतेः लक्षणं यथा साहित्यदर्पणे –

**वर्णैः शेषैः पुनर्द्वयोः।**
**समस्तपञ्चषपदो बन्धः पाञ्चालिका मता॥**[14]

यत्र माधुर्योजोगुणानां व्यञ्जकवर्णाः न भवन्ति तत्रैव पाञ्चाली रीतिः। प्रसादगुणयुक्ता रचना अस्यां रीतौ अन्तर्भुक्ता। यथा ईश्वरविलासे -

**जजागार द्विजागार विकीर्णस्वर्णसञ्चयः।**
**श्रीमान् राजाधिराजोऽसौ धन्यो धरणिमण्डले॥**[15]
**शिखासुत्रधरोदारदीप्ति राजर्षिसंस्तुतः।**
**साक्षाद्धर्मावतारोऽसौ यजमानो व्यराजत॥**[16]

एवं महाकाव्येऽस्मिन् पीञ्चालीरीतिः विद्यते।

**लाटी रीतिः –**

लाटीरीतेः लक्षणं विश्वनाथानुसारं यथा –

**लाटी तु रीतिवैदर्भीपाञ्चाल्योरन्तरस्थिता।**[17]

वैदर्भीपाञ्चाल्योः रीतयोः अन्तरे लाटी भवति। अत्र कोमलवर्णाः तथा माधुर्यगुणयुक्ताः वर्णाः भवन्ति।

**भालस्थले मङ्गलकुङ्कुमोदितां**
**मुक्ताफलाढ्यां तिलकोर्जितां श्रियम्।**
**दधौ स मूर्तामिव राजसान्वितां**
**यशोङ्किताङ्गीमिव राज्यसम्पदम्॥**[18]

अत्र श्लोके माधुर्यगुणविशिष्टवर्णानां समाहारः तथा कोमलवर्णानां समाहारः अतः लाटी रीतिः।
एवं महाकाव्येऽस्मिन् रीतीनां प्रयोगः दृश्यते।

**सन्दर्भ ग्रन्थ सूचि : -**


1. ऋग्वेदः २/२४/१४
2. काव्यालङ्कारसूत्रम् १/७/८
3. सरस्वतीकण्ठाभरणम् -१
4. साहित्यदर्पणः ९/१
5. काव्यालङ्कारसूत्रम् १/९
6. काव्यादर्शः १/४०
7. साहित्यदर्पणः ७/१२
8. साहित्यदर्पणः ९-२/३
9. ई.वि.म. /
10. ई.वि.म. ३/२
11. साहित्यदर्पणः ९-३/४
12. ई.वि.म. ३/२९
13. ई.वि.म. ९/१३
14. साहित्यदर्पणः ९/४
15. ई.वि.म. ४/१
16. ई.वि.म. ५/३९
17. साहित्यदर्पणः ३/४
18. ई.वि.म. १०/२१